# Programme : Acharya (MA)

| Programme Outcomes | | |
|---|---|---|
| **Programme name** | **Programme Code** | **Programme Outcomes** |
| **Acharya** | **A** | • स्वशास्त्रे गहनविषयप्रतिपादनसामर्थ्यम्।<br>• स्वशास्त्रे शास्त्रीयचिन्तनसामर्थ्यम् ।<br>• स्वशास्त्रे शास्त्रान्तरे च सिद्धान्तसाम्यवैषम्यावगमनसामर्थ्यम् ।<br>• स्वशास्त्रे अनुसन्धानप्रेरणाप्राप्तिः ।<br>• शास्त्रेषु अन्तस्सम्बद्धविषयाणां विषयवैविध्यस्य च अध्ययने सामर्थ्यम् ।<br>• भारतीयज्ञानविज्ञानशास्त्रपरम्परासंरक्षणे तत्परता । |
| **Programme Specific Name** | **Programme Specific Code** | **Programme Specific Outcomes** |
| **Acharya in Vyakarana** | **A-VYA** | • व्याकरणशास्त्रसिद्धान्तानां समग्रम् अध्ययनम्।<br>• व्याकरणशास्त्रसिद्धान्तानां समर्थकयुक्तीनां परिपूर्णम् अध्ययनम्।<br>• व्याकरणशास्त्रसिद्धान्तविरोधिपक्षाणाम् अन्वेषणम्।<br>• व्याकरणशास्त्रसिद्धान्तविरोधिपक्षाणां मूलतः अध्ययनेन तेषां बलपरीक्षा।<br>• व्याकरणशास्त्रसिद्धान्तमूलान्वेषणं, तत्र सम्भवतां सन्देहानां निरासः ।<br>• व्याकरणशास्त्रसिद्धान्तमूलेषु यौक्तिकत्वचिन्तनम्।<br>• व्याकरणशास्त्रसिद्धान्तमूलानां परसिद्धान्तमूलानां च विवेचनपूर्वकं समीक्षणम्। |

| 1st Semester | | |
|---|---|---|
| Course Code | Title of the Course | Course Outcomes |
| A-VYA 101 | लघुशब्देन्दुशेखरः ( संज्ञाप्रकरणात् अच्सन्धौ “न पदान्त………o”सूत्रं यावत् ) | • अस्य पाठ्यांशस्य अध्ययनानन्तरं छात्रः सिद्धान्तकौमुदीग्रन्थे व्याख्यातानां पाणिनीयसूत्राणामाशयमवगच्छति।<br>• संज्ञाप्रकरणात् अच्सन्धौ “न पदान्त…..o”सूत्रं यावत् मनोरमायां यद्व्याख्यानमस्ति ततोऽग्रे भाष्यानुगुणं प्रतिसूत्रं नागेशोक्तदिशा सिद्धान्तज्ञानं छात्रः सम्पादयति। |
| A-VYA 102 | महाभाष्यम्(1,2,3 आह्निकानि) | तत्राद्यस्य आह्निकत्रयस्य अध्यनेन –<br>• व्याकरणाध्ययनप्रयोजनानि, शब्दतत्वस्य ज्ञानम् भवति।<br>• शब्दशास्त्रज्ञानमन्तरा वेदार्थज्ञानासम्भव इत्यादिरीत्या शब्दशास्त्रस्य महत्त्वम्, प्रत्याहारसूत्रप्रयोजनं ज्ञातुं शक्नुवन्ति।<br>• मङ्गलादिविषयकज्ञानं भवति ।<br>• वृद्धिसूत्रभाष्यम्, ‘इकोगुणवृद्धी’ इतिसूत्रस्य भाष्यरीत्या सम्यक् अध्ययनं कर्तुं प्रभवन्ति। |
| A-VYA 103 | वैयाकरणभूषणसारः (धात्वर्थसुबर्थप्रकरणे) | • धात्वर्थसुबर्थप्रकरणयोरध्ययनेन छात्राः धात्वर्थसुबर्थविषये नैयायिक-मीमांसकादीनां मतानि ज्ञात्वा तद्विषये वैयाकरणानां कः सिद्धान्तः इति कौणअडभट्टमतरीत्या ज्ञातुं शक्ता भविष्यन्ति ।<br>• मुख्यतया वादग्रन्थाध्ययने अवगमने च तेषां योग्यताऽभिवर्धते। शास्त्रान्तरवादग्रन्थानपि ते अधिगन्तुं प्रभविष्यन्ति । |
| A-VYA 104 | परिभाषेन्दुशेखरः(1 तः 49 परिभाषाः) | • अस्य पाठ्यांशस्य अध्ययनानन्तरं छात्रः व्याकरणशास्त्रे आगतानां परिभाषाणामाशयमवगच्छति।<br>• तत्र विशिष्य परिभाषाज्ञापनप्रकारं, परिभाषाणां विषये पूर्वाचार्याणां सीरदेवव्याडिकैयटादीनां मतमतान्तरसमा-लोचनपूर्वकं भाष्यसम्मतं सिद्धान्तज्ञानं नागेशोक्तरीत्या प्राप्स्यति । |
| A-VYA 105 | Soft Core | |

| 2nd Semester | | |
|---|---|---|
| **Course Code** | **Title of the Course** | **Course Outcomes** |
| A-VYA 201 | लघुशब्देन्दुशेखरः (‘अदर्शनं लोपः’ इति सूत्रादारभ्यस्वादिसन्धिप्रकरणान्तम् ) | • अस्य पाठ्यांशस्य अध्ययनानन्तरं छात्रः सिद्धान्तकौमुदीग्रन्थे व्याख्यातानां पाणिनीयसूत्राणामाशयमवगच्छति।<br>• अच्सन्धौ ‘अदर्शनं लोपः’ इति सूत्रादारभ्य स्वादिसन्धिप्रकरणान्तम् यावत् मनोरमायां यद्व्याख्यानमस्ति ततोऽग्रे भाष्यानुगुणं प्रतिसूत्रं नागेशोक्तरीत्या सिद्धान्तज्ञानं छात्रः सम्पादयति। |
| A-VYA 202 | महाभाष्यम् (4,5,6 आह्निकानि) | • महाभाष्यस् 4-5-6 आह्निकानाम् अध्ययनेन अत्र व्याख्यातसूत्राणां सैद्धान्तिकं ज्ञानं प्राप्स्यति।<br>• सूत्रेषु प्रसङ्गादागतान् लौकिकन्यायान् आश्रित्य कथं वा सिद्धान्तसिद्धिः सङ्गतिर्वा इति ज्ञातुं प्रभविष्यन्ति। |
| A-VYA 203 | वैयाकरणभूषणसारः (नामार्थ-समासशक्ति-शक्ति-निपातार्थ-नञर्थ-स्फोटप्रकरणानि) | • नामार्थ-शक्ति-समासशक्ति-निपातार्थ-नञर्थ-स्फोटप्रकरणानामध्ययनेन छात्रा एषु विषयेषु नैयायिक-मीमांसकादीनां मतानि ज्ञात्वा तद्विषये वैयाकरणानां कः सिद्धान्तः इति कौण्डभट्टोक्तदिशा ज्ञातुं शक्ता भविष्यन्ति।<br>• मुख्यतया वादग्रन्थाध्ययने अवगमने च तेषां योग्यताऽभिवर्धते।<br>• शास्त्रान्तरवादग्रन्थानपि ते अधिगन्तुं प्रभविष्यन्ति। |
| A-VYA 204 | परिभाषेन्दुशेखरः (असिद्धपरिभाषातः उपपदविभक्तेः कारकविभक्ति......० इति 103 परिभाषा पर्यन्तम्) | • अस्य पाठ्यांशस्य अध्ययनानन्तरं छात्रः व्याकरणशास्त्रे आगतानां परिभाषाणामाशयमवगच्छति।<br>• तत्र विशिष्य परिभाषाज्ञापनप्रकारं परिभाषाणां विषये , पूर्वाचार्याणां सीरदेवव्याडिकैयटादीनां मतमतान्तरसमा-लोचनपूर्वकं भाष्यसम्मतं सिद्धान्तज्ञानं प्राप्स्यति। |
| A-VYA 205 | Soft Core | |

| 3rd Semester | | |
|---|---|---|
| Course Code | Title of the Course | Course Outcomes |
| A-VYA 301 | लघुशब्देन्दुशेखरः (अजन्तपुंल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गप्रकरणानि) | • अस्य पाठ्यांशस्य अध्ययनानन्तरं छात्रः सिद्धान्तकौमुदीग्रन्थे व्याख्यातानां पाणिनीयसूत्राणामाशयमवगच्छति।<br>• अजन्तपुल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग-प्रकरणस्थसूत्राणां मनोरमायां यद्व्याख्यानमस्ति ततोऽग्रे भाष्यानुगुणं नागेशमतरीत्या प्रतिसूत्रं सिद्धान्तज्ञानं छात्रः सम्पादयति। |
| A-VYA 302 | महाभाष्यम् (7,8,9 आह्निकानि) | • महाभाष्ये इति 9-8-7आह्निकत्रये “इग्यणः सम्प्रसारणम्” इति सूत्रमारभ्य ‘एङ् प्राचां देशे’ इतिसूत्रस्य भाष्यं यावत् इत्येवमादयो विषया अन्तर्भवन्ति।<br>• एतादृशा अध्ययनेनेमे विषयाः इतोऽपि स्फुटतया ज्ञायेरन्। |
| A-VYA 303 | वाक्यपदीयम् (ब्रह्मकाण्डम्) न्यायसिद्धान्तमुक्तावली (शब्दखण्डः) | • व्याकरणशास्त्रग्रन्थे दार्शनिकग्रन्थानां परिचयः अनेन सेत्स्यति। यतः वाक्यपदीयं दर्शनविधायां मुख्यं स्थानं भजते।<br>• तस्य ब्रह्मकाण्डस्य अध्ययनेन छात्राणां व्याकरणदर्शनस्य परिचयो भविष्यति।<br>• भर्तृहरिणा भाष्यस्यैव विषयाः सरलतया अत्र व्याख्याताः अतः भाष्यस्थविषयाणां अनायासेन अवगमः भविष्यति।<br>• अनेन सहैव न्यायशास्त्रे न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डस्य अध्ययनेन तत्र उपवर्णितानां शक्ति-लक्षणा-व्यञ्जनाव्यापाराणाम्, आसत्ति-योग्यता-आकाङ्क्षा-तात्पर्यादीनां च सम्यक् अवगमनं जायते।<br>• शास्त्रान्तरशैल्या ज्ञानञ्च भविष्यति। |
| A-VYA 304 | वैयाकरणसिद्धान्तलघुमञ्जूषा (सुबर्थनिर्णये प्रथमातः तृतीयाविभक्तिपर्यन्तम्) | • लघुमञ्जूषायां सुबर्थविचारस्य अध्ययनेन छात्राः विभक्त्यर्थसम्बद्धविषयेषु कैयटदीक्षितादिप्राचीनवैयाकरणैः सह नैयायिकमीमांसकादीनां मतानि ज्ञात्वा तद्विषये वैयाकरणानां कः सिद्धान्तः इति नागेशोक्तरीत्या ज्ञातुं शक्ता भविष्यन्ति।<br>• मुख्यतया वादग्रन्थाध्ययने अवगमने च तेषां योग्यताऽभिवर्धते।<br>• शास्त्रान्तरवादग्रन्थानपि ते अधिगन्तुं प्रभविष्यन्ति। |
| A-VYA 305 | Soft Core | |

| 4th Semester | | |
|---|---|---|
| **Course Code** | **Title of the Course** | **Course Outcomes** |
| A-VYA 401 | लघुशब्देन्दुशेखरः (स्त्रीप्रत्यय-अव्ययीभावप्रकरणे) | • लघुशब्देन्दुशेखरे अस्य पाठ्यांशस्य अध्ययनानन्तरं छात्रः सिद्धान्तकौमुदीग्रन्थे व्याख्यातानां पाणिनीयसूत्राणामाशयं सम्यगवगच्छति।<br>• स्त्रीप्रत्यय-अव्ययीभाव-प्रकरणस्थसूत्राणां मनोरमायां यद्व्याख्यानमस्ति ततोऽग्रे भाष्यानुगुणं प्रतिसूत्रं नागेशमतरीत्या सिद्धान्तज्ञानं छात्रः सम्पादयति। |
| A-VYA 402 | लघुशब्देन्दुशेखरः (कारकप्रकरणम्) | • लघुशब्देन्दुशेखरे अस्य पाठ्यांशस्य अध्ययनानन्तरं छात्रः सिद्धान्तकौमुदीग्रन्थे व्याख्यातानां पाणिनीयसूत्राणामाशयं सम्यगवगच्छति।<br>• कारकप्रकरणस्थसूत्राणां मनोरमायां यद्व्याख्यानमस्ति ततोऽग्रे भाष्यानुगुणं नागेशप्रतिपादनसरण्या प्रतिसूत्रं सिद्धान्तज्ञानं छात्रः सम्पादयति। |
| A-VYA 403 | वैयाकरणसिद्धान्तलघुमञ्जूषा (शक्ति-लक्षणा-व्यञ्जनाप्रकरणानि) | • वैयाकरणसिद्धान्तलघुमञ्जूषादिशा व्याकरणशास्त्रे पद-वाक्यादिषु शक्तिः इत्याख्या वृत्तिः कथं भवति, शाब्दबोधप्रकारः कः इति विषये, लक्षणावृत्तिः व्यञ्जनावृत्तिश्च कथं सम्भवति, शाब्दबोधश्च कथं भवति इति विषये छात्रः सम्यगवगमिष्यति।<br>• अनेन सह इतरशास्त्रदृष्ट्या शक्तिलक्षणाव्यञ्जनादिव्यापाराणामपि ज्ञानं प्राप्तं भवति। |
| A-VYA 404 | वैयाकरणसिद्धान्तलघुमञ्जूषा (सुबर्थनिर्णये चतुर्थीतः सप्तमीविभक्तिपर्यन्तम्) | • लघुमञ्जूषायां सुबर्थविचारस्य अध्ययनेन छात्राः विभक्त्यर्थसम्बद्धविषयेषु कैयटदीक्षितादिप्राचीनवैयाकरणैः सह नैयायिकमीमांसकादीनां मतानि ज्ञात्वा तद्विषये वैयाकरणानां कः सिद्धान्तः इति ज्ञातुं शक्ता भविष्यन्ति।<br>• मुख्यतया वादग्रन्थाध्ययने अवगमने च तेषां योग्यताऽभिवर्धते।<br>• शास्त्रान्तरवादग्रन्थानपि ते अधिगन्तुं प्रभविष्यन्ति। |
| A-VYA 405 | Soft Core | |